# sAdhana pa nchakaM

# સાધન પઞ્ચકમ્

## Document Information

Text title : sAdhana pa.nchakam

File name : saadhana-panchakam.itx

Category : panchaka, shankarAchArya, vedanta

Location : doc_z_misc_shankara

Author : Shankaracharya

Transliterated by : Sunder Hattangadi

Proofread by : Sunder Hattangadi

Description-comments : 40 items constituting @@ Vedaantic Saadhanaa @@.

Latest update : Dec. 16,1997, February 28, 2011

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

September 16, 2023

*sanskritdocuments.org*

# સાધન પઞ્ચકમ્

અદ્વૈતપઙ્ચરત્નમ્ ચ

વેદો નિત્યમધીયતાં તદુદિતં કર્મ સ્વનુષ્ઠીયતાં
તેનેશસ્ય વિધીયતામપચિતિઃ કામ્યે મતિસ્ત્યજ્યતામ્ ।
પાપૌઘઃ પરિધૂયતાં ભવસુખે દોષોઽનુસન્ધીયતા-
માત્મેચ્છા વ્યવસીયતાં નિજગૃહાત્તૂર્ણં વિનિર્ગમ્યતામ્ ॥ ૧॥

સઙ્ગઃ સત્સુ વિધીયતાં ભગવતો ભક્તિર્દૃઢાઽઽધીયતાં
શાન્ત્યાદિઃ પરિચીયતાં દૃઢતરં કર્માશુ સન્ત્યજ્યતામ્ ।
સદ્વિદ્વાનુપસૃપ્યતાં પ્રતિદિનં તત્પાદુકા સેવ્યતાં
બ્રહ્મૈકાક્ષરમર્થ્યતાં શ્રુતિશિરોવાક્યં સમાકર્ણ્યતામ્ ॥ ૨॥

વાક્યાર્થશ્ચ વિચાર્યતાં શ્રુતિશિરઃપક્ષઃ સમાશ્રીયતાં
દુસ્તર્કાત્સુવિરમ્યતાં શ્રુતિમતસ્તર્કોઽનુસન્ધીયતામ્ ।
બ્રહ્માસ્મીતિ વિભાવ્યતામહરહર્ગર્વઃ પરિત્યજ્યતાં
દેહેઽહમ્મતિરુજ્ઝ્યતાં બુધજનૈર્વાદઃ પરિત્યજ્યતામ્ ॥ ૩॥

ક્ષુદ્વ્યાધિશ્ચ ચિકિત્સ્યતાં પ્રતિદિનં ભિક્ષૌષધં ભુજ્યતાં
સ્વાદ્વન્નં ન તુ યાચ્યતાં વિધિવશાત્ પ્રાપ્તેન સન્તુષ્યતામ્ ।
શીતોષ્ણાદિ વિષહ્યતાં ન તુ વૃથા વાક્યં સમુચ્ચાર્યતા-
મૌદાસીન્યમભીપ્સ્યતાં જનકૃપાનૈષ્ઠુર્યમુત્સૃજ્યતામ્ ॥ ૪ ॥

એકાન્તે સુખમાસ્યતાં પરતરે ચેતઃ સમાધીયતાં
પૂર્ણાત્મા સુસમીક્ષ્યતાં જગદિદં તદ્બાધિતં દૃશ્યતામ્ ।
પ્રાક્કર્મ પ્રવિલાપ્યતાં ચિતિબલાન્નાપ્યુત્તરૈઃ શ્લિષ્યતાં
પ્રારબ્ધં ત્વિહ ભુજ્યતામથ પરબ્રહ્માત્મના સ્થીયતામ્ ॥ ૫॥

॥ ઇતિ પરમહંસપરિવ્રાજકાચાર્યશ્રીમચ્છઙ્કરાચાર્યવિરચિત
સાધન પઞ્ચકં સમ્પૂર્ણમ્ ॥

advaitapancharatnam

Encoded and proofread by Sunder Hattangadi

*sAdhana pa nchakaM*

pdf was typeset on September 16, 2023

Please send corrections to *sanskrit@cheerful.com*